वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

पाणिनीयसूत्राणां प्रत्याख्यानप्रसङ्गतो भाष्यकर्त्तुरभिप्रायविमर्शः

लोकेशकुमारः[१]

उपोद्धातः :-

संस्कृतवाङ्गयमनादिकालतोऽविच्छिन्नं नित्यं नवनवायमानमतिचकास्ति साहित्यजगतां पुरः। देशेभेदे कालभेदे चापि समानमेवेदमभाष्यत पाठकलोकैर्यतः। तदिदमस्य प्राशस्त्यमेतदीयव्याकरणविज्ञानाधीनमेव। व्याकरणं च नानाविधम्, किन्त्वनेकगुणत्वादद्यत्वे पाणिनीयमेव बहुमन्यते सुरभारतीप्रणयिभिर्लोकैः। तत्र महर्षिपाणिनिप्रणीताष्टाध्यायीग्रन्थस्य अत्यन्तगूढार्थतया तदीयं हार्दं प्रकाशयितुं महामुनिना पतञ्जलिना महाभाष्यमभाष्यत। यदि नाम बहुविधवादबलमादधानं पातञ्जलं महाभाष्यं नाभविष्यत्, आचार्यपाणिनेर्मनोगताभिप्रायोऽपि न शब्दशास्त्राध्यायिभिर्यथास्वमवाभोत्स्यत इत्यैकस्वर्यं शब्दविदां सुधियाम्। अत एव वाक्यपदीयटीकाकारः पुण्यराजो भर्तृहर्युक्तस्य[२] महाभाष्यमहिम्नष्टीकाप्रसङ्गे तद्विवृण्वान आह –

"तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमिति। अत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशिष्य महाभाष्यमित्युच्यते लोके। महाभाष्यं हि बहुविधविद्यावादबलमार्षं व्यवस्थितम्"[३] इति

भाष्यकारस्य प्रत्याख्यानगता व्याख्यानशैली :-

भाष्यकर्तुर्व्याख्यानपद्धतेरनुपमं वैशिष्ट्यमिदं यथासौ यत्सूत्रं समीक्षणपरतया व्याचक्षाणो भवति, तत्र तत्सूत्रव्याख्यानस्य समस्तपक्षसिद्धौ यथाशक्ति नैजमखिलमपि प्रज्ञानवैभवमाविष्कुरुते। तस्माद्यदासौ पूर्वपक्षमास्थाय तत्पक्षं प्रबलयुक्त्या प्रतिपादयन् समास्ते, तत्राकृतमतिको वा अजागरितप्रज्ञो वा पाठकस्तदुत्तरपक्षमेव मन्वानो जातुचिद् बम्भ्रमीतीव। तत्त्वतस्तु तत्रैव भाष्यकारः तस्योपस्थापितपूर्वपक्षस्य सिद्धान्तपक्षपरतया उत्तरपक्षं ततोऽपि प्रबलतरयुक्त्या सर्वथा तद्विपरीतमेव विवृण्वानो दृश्यते।

---

[१] शोधच्छात्रः, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरात, chaturlokesh@gmail.com, +91-9265423970

[२] वाक्यपदीयम्, २.४८२-४८३

[३] तत्रैव, पुण्यराजस्य प्रकाशटीका

भाष्यकारस्यायमेव शैलीविशेषो यत्रासौ यथा सम्पश्यति, तत्र तथैव प्रकृतविषयस्य समाहितिमातिष्ठते। **"पक्षान्तरैरपि परिहारा भवन्तीति"**[४] नयेन लक्ष्यलक्षणसमीक्षणपरो मण्डनीयतत्त्वस्यापि खण्डनीयतां न सर्वथा जहात्यसौ। परस्तात्तं तदुपस्थापितसिद्धान्तं कश्चन ऊरीकरोतु न वेति विचारं मुहूर्तमपि नातनोति मानसे भाष्यकार:। अत एव प्रदीपकार: कैयट **उपसर्गादसमासेऽपि णोपदेशस्य**[५] इति सूत्रस्थं भाष्यसन्दर्भं टीकमानस्तत्राचष्टे :-

"ननु सुबामन्त्रिते इत्यत्रोक्तम् अविशेषेणैतद्भवति पूर्वपदमुत्तरपदमिति, तेन चर्मनमन्नित्यत्र णत्वं न भविष्यतीति। उच्यते स्वरग्रहणप्रत्याख्यानं तदुक्तम्, न त्वेष पक्ष: स्थित:"[६] इति

इतरेणापि भाष्यसन्दर्भेण सुतरामिदं शक्यमभ्युपपत्तुं पाठकैर्यथा "**ऋलृक्**" इति प्रत्याहारसूत्रव्याख्यानप्रसङ्गे ऋकारोपदेशं व्याचक्षाणो भाष्यकार: "**चतुष्टयी शब्दानां प्रवृत्ति:**"[७] इति व्युदीर्य यदृच्छाशब्दसत्तामुररीकुर्वाणोऽपि लृकारस्य प्रत्याख्यानवेलायां **"त्रयी च शब्दानां प्रवृत्ति:, न सन्ति यदृच्छाशब्दा:"**[८] इति पक्षं पुरस्कृत्य यदृच्छाशब्दसत्तामेव उन्मूलयति।

दशायामस्यां भाष्यकारस्य नैजं सिद्धान्तगतं दुर्ग्राहमेव समास्ते बहुधा सुधियामपि। यथा ह्यत्र उक्तसिद्धान्तद्वयमुररीकृत्यापि परस्परविरोधित्वात्तदुभयं स निरस्ती चकार। भाष्यकारस्य विचित्रेयं शैली समस्तेऽपि भाष्यसन्दर्भे बहुश आलक्षयितुं शक्यास्माभि:।

तथैव क्वचन स्थलेषु भाष्यकर्तु: प्रत्याख्यानशैली इतरेतरतामाश्रित्यापि प्रवर्तमाना दृश्यते, यथासौ पूर्वसूत्रमाश्रित्य इतरत्सूत्रम, इतरच्चाश्रित्य पूर्वसूत्रं प्रत्याचष्टे। तस्मादेव भाष्यस्य टीकाकृतो भाष्यकारस्य प्रत्याख्यानविषयमिमं बहुधा तत्प्रौढिवादम् एकदेशियुक्तिप्रयुक्तं चैव मन्वाना दृश्यन्ते। तथा हि उद्योतकारो नागेशो व्याजहार –

"भगवतो भाष्यकारस्येति एकदेशिन इति शेष:। अनेन क्वचित 'इमेऽपि' क्वचित 'तर्हि' क्वचित 'यद्यपि' इत्यादिभाष्यग्रन्थ: एकदेशिन: उक्तिप्रत्युक्तिपरतया प्रौढिवाद एवेति ध्वनितम्"[९] इति

इतरत्रापि नागेशो यथा –

"वस्तुतस्त्वत्रत्यमिदं भाष्यम् एकदेश्युक्ति:"[१०] इति

---

[४] *पातञ्जलमहाभाष्यम्, प्रत्याहाराह्निकम्, ऋलृक्*

[५] *पाणिनीयाष्टाध्यायी, ८.४.१४*

[६] *तत्रैव कैयटप्रोक्तो महाभाष्यप्रदीप:*

[७] *पातञ्जलमहाभाष्यम्, प्रत्याहाराह्निकम्, ऋलृक्*

[८] *तत्रैव*

[९] *महाभाष्यप्रदीपोद्योत:,सू. ३.१.३२*

[१०] *महाभाष्यप्रदीपोद्योत:, सू. १.१.६*

भाष्यकर्तुः प्रत्याख्यानसन्दर्भस्य अभिप्रायविशेषः :-

अथ भाष्यकारस्य परस्परविरोधान्वितं प्रत्याख्यानविषयमीदृशं तदभिप्रायपरा वयं कथमभ्युपपद्यामहे इति जिज्ञासायामिदमुच्यते - **शिष्यबुद्धिव्युत्पादनाय** इति। यथामी पाणिनीयाः पाठकाः साधकबाधकतया वा आलोचनप्रत्यालोचनतया वा सूत्रस्य समस्तमपि तत्त्वगतं समीक्षाधिया विजिज्ञासनपरा भवन्त्विति। यतो बहूनि पाणिनीयसूत्राणि आपाततो भाष्यकारः प्रत्याख्यायापि तत्तत्सूत्रगरिमाणमङ्गीकुर्वाणो ह्यसौ **"आरभ्यमाणेऽप्येतस्मिन् योगे"**[११] इत्यादि भूयः प्रब्रवीति। **स्थानिवदादेशोऽनल्विधौ**[१२], **असिद्धवदत्राभात्**[१३] इत्यादीनि सूत्राणि भाष्यप्रसङ्गेऽस्मिन् विशेषतो विलोकनीयानि। इममेवाभिप्रायं जातुचिद्भाष्यकारो **"न हि दोषाः सन्तीति परिभाषा न कर्तव्या लक्षणं वा न प्रणेयम्। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्तीति यवा नोप्यन्ते। दोषाः खल्वपि साकल्येन परिगणिताः प्रयोजनानामुदाहरणमात्रम्। दोषाणां लक्षणं नास्ति प्रतिविधेयं च दोषेषु"**[१४] इत्येवमादि प्रब्रुवाणः पाणिनीयसूत्राणां प्रत्याख्यानप्रसङ्गे प्रतिध्वनयितुमीहते। अनेन च भाष्यकृद्वचनेन सूत्राणां प्रत्याख्याने च खण्डने चार्थदृशा भेदविशेषोऽपि कश्चन शक्य आस्थातुम्। तस्मात् तत्तत्पाणिनीयसूत्राणां भाष्यकृत्कृतप्रत्याख्यानसन्दर्भे खण्डनं वा अनारम्भं वास्माभिर्न मननीयम्। इतरथा भाष्यकारस्य प्रत्याख्यानसन्दर्भो यदि शिष्यबुद्धिव्युत्पादनहेतुरसौ नालक्षयिष्यत, चेद्भगवन्तं पाणिनिं तच्छास्त्रं चास्थाय भाष्यकृदुक्तं वचनमिदं वैयर्थ्यमागम्य कथङ्कारं सुसमगंस्यतः-

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण"[१५] इति

एकतो भाष्यकारः पाणिनीयशास्त्रस्य वर्णमात्रमपि नानर्थकं मनुते, अपरतश्चासौ तत्सूत्राणि वा सूत्रगतपदानि वा प्रत्याचक्षाणोऽपि दृश्यते। नूनमिह परस्परविरोधिनि तद्वचसि कञ्चन विशेषमादधानेन भाष्यकारस्याभिप्रायेण गभीरेण भाव्यमेव। अधुनातनैः प्रायेण वैयाकरणैर्भाष्यकारेण प्रत्याख्यातानि पाणिनीयसूत्राणि वा तद्गतपदानि वा निष्प्रयोजकानि मन्यन्ते। यद्येवम्, चेदुक्तानुक्तदुरुक्तचिन्ताविषयत्वात् नहीदं भाष्यं भवेल् लक्षणान्तरत्वात्।[१६] अथ तत्त्वं यदि विचिन्त्येत, चेद्भाष्यकारेण प्रत्याख्यातसूत्राणां दुरुक्तकल्पना वा निरर्थकत्वकल्पना वा न भाष्यकारेण समं न्याय्यमातनुते, न च सूत्रकारेण समम्। यदि

---

[११] *पातञ्जलमहाभाष्यम्, सू. १.१.५६*

[१२] *पाणिनीयाष्टाध्यायी, १.१.५६*

[१३] *तत्रैव, ६.४.२२*

[१४] *पातञ्जलमहाभाष्यम्, सू. १.१.३९*

[१५] *तत्रैव, सू. १.१.१*

[१६] *सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥*

नाम भाष्यकार: पाणिनीयशास्त्रस्य भूयांसमंशं दुरुक्तं वा निरर्थकं वा गणयेत, चेत्सूत्रकारं तच्छास्त्रं चोद्दिश्य उपरिष्टाद् भाष्यकृदुक्तं परस्परविरोधित्वात प्रमत्तवाक्यमेव मननीयं भवेत्, चारणानां सदृशमलीकानुशंसनं वा। अपरत इदमप्यत्र विचिन्त्यमेव यथा कुतो ह्यशेषशेमुषीसम्पन्नो महाभाष्यकार ईदृशस्य बहुलदोषस्य शास्त्रस्य व्याख्यारम्भं व्यधास्यत? यद्वा दोषाणामेव सद्बाहुल्यात् कुतो नु परवर्तिभिर्वैयाकरणै: पाणिनीयं शास्त्रमङ्ग्यकरिष्यत प्रमाणभूतं वामंस्यत?

तत्त्वतस्तु न भाष्यकार: प्रत्युक्तपाणिनीयसूत्राणि दुरुक्तानि वा निरर्थकानि वा मनुते, न चापाणिनीयत्वं शास्त्रस्य पुष्णाति। स यत्रापि पाणिनीयं कात्यायनीयं च शास्त्रं प्रत्युक्तिविषयं कुरुते, तत्र सर्वत्र प्रकारान्तरेण तत्तत्कार्यस्य सिद्धिं प्रयोजयतीति मन्तव्यम्। प्रकारान्तरेण कार्यसिद्धिसम्भावनं शास्त्रस्य महत उत्कर्षस्य प्रयोजकं कल्पते भाविनश्च शास्त्रप्रवक्तारो लाभभाजो भवन्ति। यथा हि चान्द्रे व्याकरणे सुलभमेतत्।

तस्माद्भाष्यकारस्यैव वचस्स्वेषु सङ्गतिमानेतुं स स प्रत्याख्यानविषय: तत्तत्सूत्रस्य पक्षान्तरो वा प्रकारान्तरो वा भावयितव्योऽस्माभि:, न तु तत्सूत्रप्रतिवाद इति मनुते महाभाष्याभिप्रायभर्ता महामहोपाध्यायो वैयाकरणपुङ्गव: पण्डितयुधिष्ठिरमीमांसक:।[१७]

भूतार्थतस्तु आचार्येण पाणिनिना निजपाठकानां सौहृदमासाद्य स्वीयशास्त्रस्य स्पष्टप्रतिपत्तिगतसूत्रविन्यास एव सर्वत्र महत्त्वयाञ्चक्रे। यथाह स्वयमेव भाष्यकार: पस्पशाप्रसङ्गे "**आचार्य: सुहृद् भूत्वा शास्त्रमिदमन्वाचष्टे**" इति। तस्मादेव हेतो: सूत्रेषु बहुषु प्राप्तसंहिताभावमनासाद्यैव विप्रतिपत्तिहेतूभूतानि तत्तत्सूत्राणि तथैव उपन्यस्तानि तेन। तथैव चाचार्य: प्रकरणविशेषे कस्मिंश्चिन् मूलभूतं लक्षणं प्रणीय तत्सम्बद्धान्येव इतराण्यपि लक्षणानि प्रपञ्चयति। तद्यथा "**विशेषणं विशेष्येण बहुलम्**" इति लक्षणमुपदिश्य **पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च** इत्यादीनि मूललक्षणेनापि सिद्धिं गतानां तत्तल्लक्ष्याणां सिद्ध्यर्थं तानि तानि लक्षणानि परस्तात्पुन: प्रपञ्चयत्येव।

अत एवेदं भाष्यकार आह –

"एते खल्वपि विधय: सुपरिगृहीता भवन्ति, येषु लक्षणं प्रपञ्च एव। केवलं लक्षणं केवलं प्रपञ्चो वा न तथाकारकं भवति"[१८] इति

स्पष्टप्रतिपत्तिहेतुभूतम् इममेव आचार्यस्य पाणिनेरभिप्रायमास्थाय भाष्यकार: प्राह कदाचिदिदम् –

"अन्वाख्यानमेव तर्हीदं मन्दबुद्धे:"[१९] इति

---

[१७] *युधिष्ठिरमीमांसककृता पातञ्जलमहाभाष्यस्य हिन्दीटीका, सू. १.१.१*

[१८] *पातञ्जलमहाभाष्यम्, सू. २.१.५८*

[१९] *तत्रैव, सू. १.२.३२*

तस्मादिदमुक्तं भाष्यकृत्प्रत्याख्यानवचनप्रसङ्गे तत्र तत्र सूत्रे नूनवमवधेयं पाठकैः। इतरथा तत्तत्सूत्रस्य अनारम्भपक्षे भाष्यकारप्रोक्तमिदं वचो वृथा स्यात् - **"न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति"**[२०] इति।

यद्यपि समस्तमिदमास्थाय तत्परकं व्युदीर्य चापि भाष्यकारस्तत्तत्सूत्राणि प्रत्याचष्ट एवेति विस्मयावहमेव सदिदं भाष्यकर्तुरभिप्रायविशेषं तत्र जनयति। तथा हि **'ध्रुवमपायेऽपादानम्'** इत्यत्र सूत्रे भाष्यप्रसङ्गमधीयाना विजानीयुरेवैतत्। एतच्च वाक्यपदीयकारो यथास्वमेवाह :-

निर्धारणे विभक्ते यो भीत्रादीनां च विधिः। उपात्तापेक्षितापायः सोऽबुधप्रतिपत्तये॥[२१] इति

अथात्र प्रदीपकारस्य वचोऽप्यवधेयम् –

"अबुधबोधनार्थं तु किञ्चिद्वचनेन प्रतिपाद्यते। न्यायव्युत्पादनार्थं चाचार्यः किञ्चित्प्रत्याचष्टे। न ह्यत्रैकः पन्थाः समाश्रीयते।"[२२] इति

इयमीदृशी वैचित्र्यमादधाना भाष्यशैली भाष्यकर्तुर्नैकान्तिकतया शक्यास्थातुमिति भावः।

केषाञ्चित्प्रत्याख्यातसूत्राणां समीक्षा :-

इदमिदानीमुपरिष्टादुक्तं समस्तमास्थाय उदाहरणत्वेन **'न धातुलोप आर्धधातुके'**[२३], **'दीधीवेवीटाम्'**[२४], **'नाज्झलौ'**[२५] इति यथासामान्यं प्रत्याख्यातसूत्रत्रयमाश्रित्य यथाविषयं समीक्षणपरतया किञ्चिदुच्यते :-

यथा हि भाष्यकारो **'न धातुलोप आर्धधातुके'** इति सूत्रस्य भाष्यमातन्वानः -

"अनारम्भो वा पुनरस्य योगस्य न्याय्यः। कथं बेभेदिता, मरीमृजकम्, कुषुभिता, समिधिता इति, अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः" इत्येवं प्रोच्य लक्ष्यसिद्ध्यर्थं स्थानिवद्भावप्रकारमेवास्थाय प्रकृतसूत्रस्य अनारम्भमाविष्कुरुते। तत्रैव महाभाष्यस्य टीकाकर्तुः सिद्धान्तरत्नप्रकाशकारस्य शिवरामेन्द्रसरस्वतीमहाभागस्य यथास्वं समीक्षा नूनं परिशीलनीया। यथा ह्यसौ प्राह :-

"अत्रेदमवधेयम् – लोलुवः पोपुवः इत्यादीनि प्रकृतसूत्रोदाहरणानि यानि वृत्तिकारैर्निदर्शितानि, तानि सूत्रं विनापि साधयितुं शक्यन्ते इत्येतावन्मात्राभिप्रायेण अनारम्भो वा इत्यादिभाष्यं प्रवृत्तम्, न तु सर्वथा सूत्रं मास्त्विति।

---

[२०] *तत्रैव, पस्पशाह्निकम्*

[२१] *वाक्यपदीयम्, ३.७.१४७*

[२२] *महाभाष्यप्रदीपः, ७.१.९५*

[२३] *पाणिनीयाष्टाध्यायी, १.१.४*

[२४] *तत्रैव, १.१.६*

[२५] *तत्रैव, १.१.१०*

न च सर्वत्र संज्ञापूर्वको विधिरनित्य इति गुणादिपरिहार: सिद्ध्यतीति वाच्यम्। अगतिकगतिभूतां तां परिभाषामाश्रित्य सूत्रप्रत्याख्याने 'पृषोदरादीनि यथोपदिष्टम्' इत्येतावतैव सर्वेष्टसिद्धौ समस्तशास्त्रस्य प्रत्याख्येयकर्तव्ये भाष्यकृता व्याकरणान्तरमेव कर्तुं युक्तम्, न तु पाणिनीयप्रतिष्ठापनम्। यत्र तु साक्षाद् भगवता 'इष्टमेवैतत् संगृहीतम्' इत्याद्युक्त्या सूत्रं वा तदैकदेशो वा दूरीक्रियते, तत्र यथोत्तरमुनीनां प्रामाण्यम् इति भाष्यकारोक्तमेवाङ्गीकर्तव्यम, न तु सूत्रकृतं वा वार्तिककृतं वा इति सर्वमनवद्यम्। तस्मात्स्थितमिदं सूत्रं न धातुलोप आर्धधातुके इति।"[२६]

इतरथा अत्रैव सूत्रे 'निकुचित:' इति प्रयोगं सन्निपातलक्षणप्रसङ्गमास्थाय साधयन् **'कृन्मेजन्त:'**[२७] इति सूत्रे भूय: प्रसङ्गप्राप्तस्य 'निकुचित:' इति प्रयोगस्य साधने प्रकृतां परिभाषां खण्डयन् **'न धातुलोप आर्धधातुके'** इति सूत्रस्य प्रतिष्ठापनं कथं प्रकुर्वीत भाष्यकार:? तथा हि तत्र भाष्यकृद्वच: –

"**अस्त्वत्राकित्त्वम्, न धातुलोप आर्धधातुके इति प्रतिषेधो भविष्यति।**"[२८] इति

अथ **'दीधीऽवेवीटाम्'** इत्यत्र सूत्रे प्रत्याख्यानदृशा तादृशांस्तर्कानुपस्थापयन् प्राह भाष्यकारो यथा – "**अयं योग: शक्योऽकर्तुम्**"[२९] इति

इहापि सिद्धान्तरत्नप्रकाशकारो भाष्यकाराभिप्रायविशेषं सुतरां व्यञ्जयन् प्रकृतस्य पाणिनीयसूत्रस्यैव प्रतिष्ठामातिष्ठमानो यथायथमाह :-

"**वस्तुतस्तु एतादृशक्लिष्टकल्पनापेक्षया सूत्रस्थापनमेव वरम्, अन्यथा समस्तं शास्त्रमाकुलं स्यादित्यन्यदेतत्।**"[३०] इति

अथ च **'नाज्झलौ'** इति सूत्रस्य प्रयोजनमन्यथा साधयन् **'सिद्धमनच्त्वात्'**[३१] इति व्युदीर्य प्रकृतसूत्रमपि प्रत्याचक्षाण इव दृश्यते भाष्यकार:। तत्र त्विदमेव विचिन्तनीयं यथा ऊष्मवर्णानाम् ईषद्विवृतत्वमिति प्रयत्नानन्तरप्रतिष्ठापनेन **'नाज्झलौ'** इति सूत्रस्य निष्प्रयोजनता लक्षिता, तथा येषां मतेन ऊष्मणां विवृतत्वमिष्यते, तत्र अज्झलो: सावर्ण्यप्रतिषेधार्थं **'नाज्झलौ'** इति सूत्रं सप्रयोजनतामप्यावहतीत्यवधेयम्। आचार्येण पाणिनिना तावदिममेव पक्षमास्थाय **'नाज्झलौ'** इति सावर्ण्यप्रतिषेधसूत्रं प्रणिन्ये इति शक्यमास्थातुम् इति पण्डितयुधिष्ठिरमीमांसक:।

एतदतिरिच्य इतरत्रापि प्रत्याख्यानप्रसङ्गोपात्तभाष्यविवरणेषु सदृश्येव विचारसरणी समासादनीया। अत: -

---

[२६] *महाभाष्यस्य सिद्धान्तरत्नप्रकाशटीका, सू. १.१.४*

[२७] *पाणिनीयाष्टाध्यायी, १.१.३९*

[२८] *तत्रैव, पातञ्जलमहाभाष्यम्*

[२९] *पातञ्जलमहाभाष्यम्, सू. १.१.६*

[३०] *तत्रैव, सिद्धान्तरत्नप्रकाशटीका*

[३१] *पातञ्जलमहाभाष्यम्, सू. १.१.१०*

सूत्रेष्वेवं हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके। सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितम्॥[३२]

इति तन्त्रवार्त्तिककारस्योक्तिमास्थाय स्वीयसामर्थ्ययोगात्[३३] पाणिनीयशास्त्रे क्वचिदपि किञ्चिदपि निरर्थकम् अभावयतो भाष्यकारस्य समस्तेऽपि सूत्रप्रत्याख्यानसन्दर्भे तस्यैव वच:प्रामाण्यमुपन्यस्य विषयोऽयमुपसंह्रियते :–

"सिद्ध्यत्येवम्, अपाणिनीयं तु भवति। तस्माद् यथान्यासमेवास्तु"[३४] इति।

सोऽयमेवोपस्थापितपक्षो भाष्यकारान्तर्गर्भितभावविशेषेण उपोद्बलित: समाश्रयितव्य: पाणिनीयैरित्यलम्।

सन्दर्भग्रन्थसूची :-

१. भाष्यप्रदीपोद्योतसमुल्लसितं पातञ्जलमहाभाष्यम्, सम्पा. श्रीभार्गवशास्त्रीजोशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, १९८७

२. महाभाष्यम्, हिन्दीव्याख्यासहितम्, व्याख्याकार: पण्डितयुधिष्ठिरमीमांसक:, रामलालकपूरट्रस्ट, बहालगढम्, वि.सं. २०४९

३. पाणिनीय: अष्टाध्यायीसूत्रपाठ:, सम्पा. ब्रह्मदत्तजिज्ञासु:, रामलालकपूरट्रस्ट, बहालगढम्, वि.सं. २०५८

४. वाक्यपदीयम्, सम्पा. पण्डितश्रीरघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी, १९९१

५. संस्कृतव्याकरणशास्त्र का इतिहास, पण्डितयुधिष्ठिरमीमांसक:, रामलालकपूरट्रस्ट, बहालगढम्, वि.सं. २०४१

~~~~~~~~~~~

[३२] *तन्त्रवार्तिकम्, २.३.११*

[३३] *पातञ्जलमहाभाष्यम्, सू. ६.१.७७*

[३४] *पातञ्जलमहाभाष्यम्, सू. १.१.१*
~~~~~~~~~~~